National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(61): 185-188
© 2025 NJHSR
www.sanskritarticle.com

**राजेन्द्रकुमारझा:**
शोधच्छात्रः, ज्योतिषविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
मुम्बईपरिसरः (प्राक्तनः),
नासिकपरिसरः, महाराष्ट्रः (वर्त्तमानः)

**Correspondence:**
**राजेन्द्रकुमारझा:**
शोधच्छात्रः, ज्योतिषविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
मुम्बईपरिसरः (प्राक्तनः),
नासिकपरिसरः, महाराष्ट्रः (वर्त्तमानः)

# व्यवहारे कुण्डल्यां नाभसयोगविमर्शः


**राजेन्द्रकुमारझा:**

नाभसयोगानासङ्ख्याविषये मुख्यरूपेण द्वात्रिंशत् (32) नाभसयोगाः सन्तीति प्रायः सर्वैर्ज्योतिषवोद्वद्भिः स्वीक्रियते।[1] एतेषां द्वात्रिंशत् नाभसयोगानां नामविषये कुत्रचिदाचार्याणामतेषु वैविध्यमस्ति। यथा सारावल्यां मूसलयोगः बृहत्पाराशरहोराशास्त्रे मूशलयोग इत्युच्यते। परञ्च नाभेदेनापि स्वरूपेऽधिको भेदो नास्ति। प्रत्येकं नाभसयोगस्य कुण्डल्या विवेचनं ज्योतिषग्रन्थेष्वस्ति। तत्र व्यवहारे कुण्डल्यां नाभसयोगानां विचारः कृतः नैकेषु ग्रन्थेषु। तत्र विविधग्रन्थेषूक्तनाभसयोगानां कुण्डल्या विचारोऽत्रास्ति। द्वात्रिंशत् नाभसयोगानां नामानि सन्ति -


| | | | |
|---|---|---|---|
| 1) नौका | 2) छत्रः | 3) कूटः | 4) कार्मुकः |
| 5) शृङ्गाटकः | 6) वज्रः | 7) दामनी | 8) पाशः |
| 9) वीणा | 10 सरोजः | 11) मुसलः | 12) वापी |
| 13) हलः | 14) शरः | 15) समुद्रः | 16) चक्रः |
| 17) माला | 18) सर्पः | 19) अर्धचन्द्रः | 20) यवः |
| 21) केदारः | 22) गदा | 23) विहगः | 24) यूपः |
| 25) युगः | 26) शकटः | 27) शूलः | 28) दण्डः |
| 29) रज्जुः | 30) शक्तिः | 31) नलः | 32) गोलः[2] |

**आश्रययोगानां कुण्डली-विचारः** - यदि सर्वे ग्रहाः चरराशिषु सन्ति तर्हि रज्जुयोगः, यदि सर्वे ग्रहाः नियतराशिषु सन्ति तर्हि मुशलयोगः यदि सर्वे ग्रहाः द्वयराशिषु सन्ति तर्हि नलयोगः - एते त्रयः आश्रययोगाः सन्ति।[3] [4]एतेषु द्वात्रिंशद्योगेषु समस्तचराचराणां जन्म स्थितिश्च भवति। एतेषु मणित्थाद्याचार्यमतेषु एकादशतमो योगो मुसलयोगः, एकोनत्रिंशत्तमो योगो रज्जुयोगः, एकत्रिंशत्तमो नलयोगश्च एते त्रयो योगाः मिलित्वा आश्रयसञ्ज्ञकाः सन्ति। एतेषु योगेषु गोलयुगशूलपाश-वीणाकेदारदामिनीयोगा एते सप्त सङ्ख्यासञ्ज्ञकाः सन्ति। यस्य जातकस्य अमिश्रिते आश्रययोगे जन्म भवति । स जातकः सुखलाभगुणैर्युक्तो भवति। किन्तु अत्र यदि आश्रययोगः अन्येन योगेन सह मिश्रितो भवेच्चेत् तदा आश्रयोगोक्तं फलं न भवति । यथाह-


**गोलयुगशलपाशा वीणाकेदारदामिनीसञ्ज्ञाः।**
**सप्तैते सङ्ख्याख्याः पूर्वाचार्यैः समुद्दिष्टाः॥**[5]





रज्जुयोगः




मुसलयोगः




नलयोगः





स्रक/मालायोगः


**आकृतियोगानां कुण्डली-विचारः -** यदि सर्वे ग्रहाः समीपस्थकेन्द्रद्वये सन्ति तर्हि गदायोगः निर्मीयते। यदि सर्वे ग्रहाः केवलं लग्ने सप्तमे वा भवन्ति तर्हि शकटयोगः निर्मीयते। यदि सर्वे ग्रहाः दशमचतुर्थयोर्भवन्ति तदा विहगयोगः भवति। यदि सर्वे ग्रहाः लग्ने नवमे पञ्चमे भावे च सन्ति तर्हि शृङ्गाटकयोगः भवति।[6] भुजङ्गमालायोगयोः सञ्ज्ञा आकृतियोगः विद्यते। किन्तु बृहत्पाराशरग्रन्थे अनयोः योगयोः सञ्ज्ञा फलसञ्ज्ञा अस्ति। तत्रोक्तम् **- मालाख्यः सर्पसञ्ज्ञश्च दलयोगौ प्रकीर्तितौ** ।[7] यस्य जातकस्य जन्म आकृतियोगे भवति। स जातकः स्वभाग्येनानन्दितः, धनागमकर्ता, राजप्रियः, विख्यातः प्रायः सुखयुक्तश्च भवति।[8]


यस्य जातकस्य जन्म आकृतियोगे भवति। स जातकः अन्यस्य भाग्येन सुखी, परभाग्येन च जीवनं यापयति। प्रायः सर्वदा जातकोऽयं अशान्तो भवति।[9] यस्य जातकस्य जन्म आकृतियोगे भवति। स जातकः क्वचित्तु स्वभाग्येन क्वचिच्च परभाग्येन सुखी भवति। विपरीतक्रमे जातकोऽयं स्वभाग्येन परभाग्येन च दुःखी अपि भवति।[10] यदि सर्वे ग्रहाः २,६,१०,३,७,११,४, ८,१२ इत्यत्र स्युस्तदा हलयोगः भवति। यदि शुभग्रहः लग्ने सप्तमे भावे भवति तथा च दुष्टग्रहः दशमचतुर्थेषु भवेत्तर्हि 'वज्रयोगः भवति। प्रत्युत यदि १, ७ गृहेषु दुष्टग्रहाः, ४, १० गृहेषु च शुभग्रहाः स्युस्तर्हि यवयोगः निर्मीयते। यदि सर्वेषु केन्द्रेषु मिश्रिताः शुभाशुभग्रहाः सन्ति तर्हि कमलयोगः निर्मीयते ।[11]

गदायोगः




शकटयोगः





शृङ्गाटकयोगः




पक्षी/विहगयोगः

**नौकाकूटछत्रचापयोगानां कुण्डली-विचारः -** यदि कुण्डल्यां लग्नात् सप्तमपर्यन्तमविरताः सप्त ग्रहाः स्युश्चेत्तदा योगोऽयं नौकायोग उच्यते। चतुर्थाद् दशमपर्यन्तमविरताः सप्त ग्रहां स्युः तर्हि कूटयोगो भवति। एवमेव सप्तमाद् लग्नपर्यन्तं ग्रहाणां विद्यमाने सति छत्रयोगः भवति। क्रमेऽस्मिन्नेव दशमात् चतुर्थपर्यन्तं ग्रहाणामवस्थितिः चापयोगो भवति।[12] कूटयोगे जातकः, असत्यवादी, धूर्तः, बन्धन-पालः, निर्भयः, दूतः, क्रुरः, गिरिदुर्गवासी च भवति।[13]


कुण्डल्यां नौकायोगः स्याच्चेत्तदा जातको जलेन जीविकामर्जयति। जलसंसाधनेन च विभवधनयशोबलादयः प्राप्नोति। स जातकः अधिकधनवान्, यशस्वी, प्रसन्नचित्तः, कृपणः, चलस्वभावयुक्तश्च भवति।[14] बृहपाराशरग्रन्थेऽपि इदमेव फलमुक्तम्। तत्रोक्तम् -

**सलिलोपजीविविभवा बह्वाशाः ख्यातकीर्तयो दृष्टाः।**
**कृपणा बलिनो लुब्धा नौसञ्ज्ञाताः खलाः पुरुषाः ॥**[15]

नौकायोगः



कूटयोगः



छत्रयोगस्य फलविषये सारावल्यां वचनमस्ति यत् छत्रयोगे उत्पन्नो जातकः स्वजनानामश्रयो भवति। स दयालुस्वाभवान भवति। समाजे तस्य व्यवहारः दानप्रियः, राजप्रियः उत्तमबुद्धियुक्तश्च भवति। तस्य जातकस्य बाल्यकालः सुखयुक्तो भवति। स जातकः वृद्धावस्थायां सौभाग्ययुक्तो भवति।[16] चापयोगस्य फलं सारावल्यां निगदितं यत् चापयोगे उत्पन्नो जातकः असत्यभाषी, गुप्तिपालः, चोरः, धूर्तश्च भवति। जातकोऽयं अस्मिन् योगे मध्यावयसि भाग्यहीनो भवति। यथाह -

**आनृतिकगुप्तिपालाश्चौराः कितवाश्च कानने निरताः ।**
**कार्मुकयोगे जाता भाग्यविहीना वयोमध्ये ॥**[17]


**यूपशरशक्तिदण्डयोगानां कुण्डली-विचारः-** यस्य कुण्डल्यां लग्नाद-विरतं चतुर्थपर्यन्तः सर्वे ग्रहाः स्युः तर्हि यूपयोगो भवति। चतुर्थतात्सप्तमपर्यन्तं सर्वे ग्रहाः स्युः तर्हि शरयोगो भवति। सप्तमाद्दशमपर्यन्तं सर्वे ग्रहाः स्युस्तर्हि शक्तियोगो भवति। दश्माद् लग्नपर्यन्तं सर्वे ग्रहाः स्युस्तर्हि दण्डयोगो भवति। एते योगाः सत्याचार्यस्य प्रियाः योगाः सन्ति।[18]

यूपयोगे उत्पन्नः जातको ज्ञानी, यज्ञकर्ता, स्त्रीयुतः, सत्ययुक्तः, व्रतनियमादिभिं संयुक्तो विशिष्टो भवति।[19] शरयोगे जातः जातकः शरणकर्त्ता, मृगयाधनेन सुखी, मांसभक्षी, हिंसकः दुष्टशिल्पकर्ता च भवति ।[20] दण्डयोगे जातः पुरुषः स्त्रीपुत्रेभ्यः हीनः, दरिद्रः, निर्लज्जः, स्वजनपरित्यक्तः, दुःखितः, नीचानां दासः च भवति।[21] शक्तियोगे


उत्पन्नः पुरुषः दरिद्रः, निष्फलः, दुःखी, नीचः, आलसी, दीर्घजीवी, सङ्ग्रामबुद्धियुतो निपुणश्च भवति । यथोक्तम् -

**धनरहितविफलदुः खितनीचालसाश्चिरायुषः पुरुषाः।**


**संग्रामबुद्धिनिपुणाः शक्त्यां जाताः स्थिराः सुभगाः॥**[22]




नृपयोगः



दण्डयोगः



शक्तियोगः




वज्रयोगः


**अर्धचन्द्रगदायोगयोः कुण्डली-विचारः -** कुण्डल्याः केन्द्राद्भिन्नस्थाना-दारभ्य सप्तसु स्थानेषु क्रमानुसारं ग्रहाणां विद्यमाने सति अर्धचन्द्रनामको योगो भवति। कुण्डल्यामर्धचन्द्रयोगो भवेच्चेत्तदा जातकः भाग्यवान्, सुडौलशरीरयुतः, सेनानायकः, राजप्रियः, बलवान् स्वार्णाद्याभूषणैर्युक्तश्च भवति। यथाह -

**सुभगाः सेनापतयः कान्तशरीराः नृपप्रियाः बलिनः।**

**मणिकनकभूषणयुता भवन्ति योगेऽर्धचन्द्राख्ये॥**[23]




अर्धचन्द्रयोगः




कमलयोगः


गदायोगः




सर्पयोगः



यदि समीपस्थयोर्द्वयोर्द्वयोः केन्द्रयोः सर्वे ग्रहाः स्युस्तर्हि गदायोगो भवति। यदि कुण्डल्यां लग्नसप्तमभावयोः सर्वे शुभग्रहाः स्युः अथ च चतुर्थदशमभावयोः सर्वे पापग्रहाः स्युश्चेत्तदा वज्रयोगो भवति । यदि लग्नसप्तमभावयोः सर्वे पापग्रहाः स्युः एवं चतुर्थदशमभावयोः सर्वे शुभग्रहाः स्युः तर्हि यवयोगो भवति । उक्तस्थानेषु ग्रहाः मिश्रिताः स्युः तर्हि पद्मयोगो भवति । तत्रैव सर्वे ग्रहार्यदि बहिः स्युस्तर्हि वापीयोगो भवति।[24] वज्रयोगस्य फलविषये सारावल्यामुक्तं यत् योगेऽस्मिन् उत्पन्नो जातकः प्रारम्भे अन्ते च सुखी भवति। स जातकः शूरवीरः, नीरोगी, भाग्यहीनः स्वजनविरुद्धश्च भवति।[25] जातकस्य कुण्डल्यां यदि यवयोगोऽस्ति चेत्तदा जातकः व्रतनियमवान् भवति। स शुभकर्मसु सर्वदा तत्परो भवति। स जातकः मध्यावस्थायां सुखमनुभवति । स धनस्याधिक्याद् दानं करोति। स स्थिरस्वभाववान् भवति। यवयोगे उत्पन्नः जातकः व्रतयुक्तः, नियमबद्धः, शुभकर्मसु तत्परश्च भवति। जातकोऽयं मध्यावस्थायां धनसुखयोर्युक्तो भवति। अत्यधिकधनं स सुपात्राय दानरूपे ददाति।



यपयोगः



यवयोगः

**सन्दर्भसूची -**

1. बृहत्पाराशरहोराशास्त्रम्
2. सारावली,
3. लघुजातकम्
4. बृहज्जातकम्

**संदर्भः –**

[1]यवनाद्यैर्विस्तरतः कथिता योगास्तु नाभसा नाम्ना।
अष्टादशशतगुणितास्तेषां द्वात्रिंशदिह वक्ष्ये ॥सारावली, 21.1
आश्रयाख्यास्त्रयो योगाः दलयोगद्वयं ततः।
आकृतिर्विंशतिः संख्या योगानां सप्तकं स्मृतम् ॥
रज्जुयोगो मूसलश्च नलो मालाभुजङ्गमौ।
गदायोगश्च शकटः शृङ्गाटकविहङ्गमौ ॥
हलवज्रयवाश्चैव कमलो वापियूपकौ ।
शरशक्तिदण्डनौकाकूटछत्रधनूषि च ॥
अर्धेन्दुयोगश्चक्राख्यः समुद्रश्चेति विंशतिः।
वीणादामनिकायोगः पाशकेदारशूलकाः॥
युगगोलौ ततः प्रोक्तौ योगाद्वात्रिंशका इमे।
तेषां च लक्षणं वक्ष्ये यथा बुद्धिविवेकतः ॥
बृहत्पाराशरहोराशास्त्रम्, नाभसादियोगाध्यायः, 14.1-6

[2]नौच्छत्रकूटकार्मुकशृङ्गाटकवज्रदामनीपाशाः।
वीणासरोजमुसला वापीहलशरसमुद्रचक्राणि ॥
माला सर्पोर्धेन्दु यवकेदारो गदाविहगयूपाः।
युगशकटसूलदण्डा रज्जुः शक्तिस्तथा नलो गोलः॥
सचराचरस्य जगतो योगैरेभिः प्रकीर्त्यते प्रसवः।
आश्रयजातान् प्राहुर्माणित्था मुसलरज्जुनलयोगान्॥ सारावली, 21.2-4

3सर्वे चरस्था अपि वा स्थिरस्था द्विदेहसंस्था यदि वा भवन्ति ।
क्रमेण रज्जुर्मुशलं नलश्च योगत्रयं स्यादिदमाश्रयाख्यम् ।।

4बृहत्पाराशरहोराशास्त्रम्, नाभसादियोगाध्यायः, 14.7

5सारावली, 21.5

6आसन्नकेन्द्रद्वयगैर्गदाख्यो लग्नास्तसंस्थैः शकटः समस्तैः ।
खवन्धुयातैर्विहगः प्रदिष्टः शृङ्गाटकं लग्नवात्मजस्थैः॥
बृहत्पाराशरहोराशास्त्रम्, नाभसादियोगाध्यायः, 14.9

7बृहत्पाराशरः, 34.3

8नन्दति स्वभाग्यैर्नृपलब्धाधना नृपप्रियाः ख्याताः।
प्रायेण सौख्ययुक्ताश्चाकृतियोगेषु ये जाताः ॥ सारावली, 21.8

9सारावली, 21.9

10 सारावली, 21.10

11 धनादिस्वास्थैस्त्रिमदायगैर्वा चतुर्थरन्ध्रव्ययसंस्थितैर्वा।
नभस्तलस्थैर्हलनामयोगः किलोदितोऽयं निखिलागमज्ञैः ॥
लग्नस्मरस्थानगतैः शुभाख्यैः पापैश्चमेपूरणवन्धुयातैः।
वज्राभिधस्तैर्विपरीतसंस्थैर्यवश्च मित्रैः कमलाभिधानः ॥
बृहत्पाराशरहोराशास्त्रम्, नाभसादियोगाध्यायः, 14.10-11

12 होरादिकण्टकेभ्यः सप्तर्क्षगतैः क्रमेण योगाः स्युः।
नौकूटच्छत्रकार्मुकनिर्दिष्टाः पूर्वयवनेन्द्रैः ॥ सारावली, 21.11

13 आनृतिककितवबन्धनपाला निष्कञ्चनाः शठाः, क्रुराः।
कूटसमुत्था नित्यं भवन्ति गिरिदुर्गवासिनो मनुजाः ॥ सारावली, 21.22

14 सलिलोपजीविविभवा बह्वाशाः ख्यातकीर्तयो हृष्टाः।
कृपणा बलिनो लुब्धा नौसम्भूताश्चलाः पुरुषाः ॥ सारावली, 21.21

15 बृहत्पाराशरः, 34.36

16 सारावली, 21.23

17 सारावली, 21.24

18 लग्नादिकण्टकेभ्यश्चतुर्गृहावस्थितैर्ग्रहैर्योगाः।
यूपशरशक्तिदण्डाः सत्याचार्यप्रिया नित्यम् ॥ सारावली, 21.12

19 आत्मविदिज्यानिरतः स्त्रिया युतः सत्त्वसंपन्नः ।
व्रतयमनियमे यूपे जातो विशिष्टश्च॥
बृहत्पाराशरहोराशास्त्रम्, नाभसादियोगाध्यायः, 14.31

20 इषुकरणे च समर्था मृगयाधनसेविताश्च मांसादाः ।
हिंस्राः कुशिल्पकराः शरयोगे मानवाः प्रसूयन्ते ॥
बृहत्पाराशरहोराशास्त्रम्, नाभसादियोगाध्यायः, 14.32

21 हतदारपुत्रनिःस्वाः सर्वत्र च निघृणाः स्वजनवाह्याः ।
दुःखितनीचप्रेष्या दण्डप्रभवा भवन्ति नराः॥
बृहत्पाराशरहोराशास्त्रम्, नाभसादियोगाध्यायः, 14.34

22 बृहत्पाराशरहोराशास्त्रम्, नाभसादियोगाध्यायः, 14.33

23 सारावली, 21.25

24 सारावली, 21.14

25 सारावली, 21.26